No. ४४८१

Title गायत्री ब्रह्म कल्पः

Author ×

Extent १६ Age ×

Subject तन्त्रम्

गायत्रीब्रह्मकल्पः

४४८१

गायत्री.व.म.कल्प

गायत्रीमंत्रकल्प

२००

यजनं ॥ अथ गायत्री ब्रह्मकल्पः ॥ नारद उवाच ॥
...री न्यासं वर्णरूपं च कीदृशं ॥ ऋषिश्छंदो देवताश्छंदश्चावाहनं विसर्जने ॥ १ ॥ हृदयं च शिखा गोत्रं तथा शीर्षं च कीदृशं ॥ विनियोगस्तथा कुक्षिः पादौ तु परमेश्वर ॥ २ ॥ ध्यानं मुखं च मालां न्यासपदन्यासविधिं नतः ॥ तद्वदस्व प्रभो नूनं मे कमलासन ॥ ३ ॥ ब्रह्मोवाच ॥ अतो वक्ष्यामि पुत्र शृणु वत्स द्विजोत्तम ॥ छंदो गायत्री गायत्र्याः सविता चैव देवता ॥ ४ ॥ शुक्लो वर्णो मुखं चाग्निर्विश्वामित्र ऋषिस्तथा ॥ ब्रह्मा शिरः शिखा रुद्रो विष्णुर्हृदयं तथैव च ॥ ५ ॥ तस्याः सांख्यायनं गोत्रं सा चतुर्विंशत्यक्षरा ॥ त्रिपदा चैव षट्कुक्षिः पंचशीर्षा भवंति हि ॥ ६ ॥ ऋग्वेदोऽस्याः प्रथमः पादो भवति ॥ यजुर्वेदो द्वितीयः । सामवेदस्तृतीयः ॥ ७ ॥ पूर्वेति प्रथमा कुक्षिर्भवति । दक्षिणा द्वितीया । पश्चिमा तृतीया । उत्तरा चतुर्थी । ऊर्ध्वा पंचमी । अधोऽस्याः षष्ठी ॥ ८ ॥ व्याकरणमस्याः प्रथमं शीर्षं भवति । शिक्षा द्वितीयं कल्पस्तृतीयं निरुक्तं चतुर्थं ज्योतिषामयनमिति पंचमं ॥ ९ ॥ एवं ज्ञात्वा तु गायत्रीं जपेद्द्वादशाक्षरं । त्रिपदस्त्वाक्षरा तथा चतुष्पादा षडक्षरा ॥ १० ॥ जपेत्तु त्रिपदा ब्र...

गा० भि० ५

न्तोऽग्रचेलितु चतुष्टयम्॥ न्यासं कुर्यात्तथा आद्ये अग्निकार्ये ... नामादयश्री
यान्यस्य निहितं शरीरे चात्मनो बुधः॥ चतुर्विंशतिस्थानेषु पादौ यावन्मस्त
कं॥११॥ अथ न्यासक्रमः॥ आचमनं॥ ब्रह्मपुरस्वरूपे विरूपाक्षु ऊर्ध्वकेशि
विरूपाक्षि मांसशोणितभोजने॥ तिष्ठ देवि शिखाबंधे चामुंडे ह्यपराजि
ते॥१२॥ ब्रह्मवादिसहस्राणि रुद्रशूलशतानि च॥ विष्णोर्नामसहस्रा
णि शिखाबंधं करोम्यहं॥१३॥ अनेन मंत्रेण गायत्र्या वा। मानस्तोक इत्य
नेन वा स्वशिखामाबध्य आचम्य। सहस्रत्रोणि स्वहस्त स्पर्वा कोऽस्त वहेतपः॥ ध्य९
तान्नमीशानो भगवः पराचीनो मुखावृद्धी इति मंत्रेण वाक्हृदयं च स्प
स्पृष्ट्वा। उत्तिष्ठंतु विघ्नभूतानि नूर्मोति ष्ठन्तु भूपतिः॥ भूतानामविरोधेन
ब्रह्मकर्म समारभे॥१४॥ इति महीं प्रार्थ्य। दर्भमुष्टिमादाय पृथ्वीति मंत्र
स्य मेरुपृष्ठ ऋषिः कूर्मो देवता सुतलं छंदः आसने विनियोगः॥ पृ
थ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता॥ त्वं च धारय मां देवि पवित्रं
कुरु चासनं॥ अंतरितं रक्षोऽन्तरिता अरातयः॥ विश्वधात्र्यै नमः। माया
कूर्माय नमः। अनंताय नमः। इति दर्भैरासनं परिकल्प्य। अपकामन्तु

भू... शाचाः सर्वतो दिशं॥ सर्वेषामविरोधेन ब्रह्मकर्म समारभे॥ इ
ति भूतान्यपसार्य। ॐ सर्वभूतनिवारणाय शार्ङ्गाय सशराय अस्त्रराजा
य सुदर्शनाय हुं फट् इति सुदर्शनमन्त्रेण दिग्बंधं च कृत्वा। गुरुभ्यो न
मः। परमगुरुभ्यो नमः। परमेष्ठीगुरुभ्यो नमः। परापरगुरुभ्यो नमः
। गं गणपतये नमः। दुं दुर्गायै नमः। क्षं क्षेत्रपालाय नमः। वं वटुक
नाथाय नमः। इति गुर्वादीन् नमस्कृत्य आचम्य संकल्प्य। गायत्रीम
न्त्रांगत्वेन भूतशुद्धिप्राणप्रतिष्ठामातृकान्यासं च कृत्वा सविशेषं ध्या
नं कुर्यात्॥ तद्यथा। ॐ गोविंदाय अंगुष्ठाभ्यां नमः। ॐ महीधरा
य तर्जनीभ्यां नमः। ॐ हृषीकेशाय मध्यमाभ्यां नमः। ॐ त्रिविक्रमाय
अनामिकाभ्यां नमः। ॐ विष्णवे कनिष्ठिकाभ्यां नमः। ॐ माधवाय क
रतलकरपृष्ठाभ्यां नमः। इति करांगुलीन्यासं कृत्वा। ॐमित्येकाक्षर
स्य परब्रह्मऋषिः परमात्मा देवता दैवी गायत्री छंदः। अग्निर्बीजं। ॐ ।।२।।
शक्तिः। मं कीलकं। विद्युद्वर्णः। उदात्तस्वरः। [illegible] गोत्रं। हृत्त्राणं [illegible]
वसिष्ठविश्वामित्रभरद्वाजाऋषयः। ब्रह्मविष्णुम...

गायत्रीत्रिष्टुपजगत्यः छंदांसि। अंतरिक्षं द्यौरिति स्थानानि। गार्हपत्यद
क्षिणाग्न्याहवनीयास्तथाग्नयो [illegible] विष्णुस्सोमा देवताः। जाग्रत्स्वप्नसुषुप्त
योऽवस्थाः। सप्तानां व्याहृतीनां विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठ
कश्यपा ऋषयः। अग्निवायुसूर्यबृहस्पतिवरुणेंद्रविश्वेदेवा देवताः। गा
यत्र्युष्णिगनुष्टुप्बृहतीपंक्तित्रिष्टुप्जगत्यः छंदांसि। श्वेतश्यामपीत
पिंगनीललोहितकनकावर्णाः। षड्जऋषभगांधारमध्यमपंचमधैवत
निषादाः स्वराः। पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनो बीजानि। अंकि
र्तिमायाधृतिमेधास्मृतिवाचः शक्तयः। अग्नि [illegible] काश्यपगौतमांगि
रसभार्गवकौशिकवासिष्ठानि गोत्राणि। शब्दस्पर्शरूपरसगंधमनोबु
द्धयस्तत्वानि। विततसमंजलिकशाकटविस्तृतयमपाशग्रथितव्या
पकामुद्राः। प्राणापानव्यानोदानसमानमनोबुद्धिजनितपापोपशम
नं फलं। मध्यगायत्र्या गायत्री छंदः। विश्वामित्र [illegible] ऋषिः। सविता देव
ता। शिरसः परमेष्ठी प्रजापति ऋषिः। परमात्मा देवता। त्रिष्टुप् छंदः।

सर्वेस्वराः। दीप्तो वर्णः। सर्वकर्मारंभे प्राणायामे विनियोगः। ततः प्राणा
यामन्त्रन्यासं कुर्यात्॥ ॥यथा ॐ भूः नाभ्यै नमः। ॐ हृदयाय नमः
ॐ मंमुखाय नमः। ॐ भूः पादाभ्यां नमः। ॐ भुवः जानुभ्यां नमः। ॐ स्वः गुह्या
य नमः। ॐ महः नाभ्यै नमः। ॐ जनः हृदयाय। ॐ तपः कंठाय। ॐ सत्यं मूर्ध्ने
नमः। ॐ तत्सवितुर्ब्रह्मात्मने हृदयाय नमः। ॐ वरेण्यं विष्ण्वात्मने शिर
से स्वाहा। ॐ भर्गो देवस्य ज्योतिरात्मने शिखायै वषट्। ॐ धीमहि सत्या
त्मने कवचाय हुं। ॐ धियो यो नः ज्ञानात्मने नेत्रत्रयाय वौषट्। ॐ प्रचो
दयात्सत्यात्मने अस्त्राय फट्। ॐ आपः स्तनाभ्यां नमः। ॐ ज्योतिर्नेत्राभ्यां
नमः। ॐ रसो जिह्वायै नमः। ॐ अमृतं ललाटाय नमः। ॐ ब्रह्म भूर्भुवः
3 स्वरों कवचाय हुं। ततोऽनामिकाकनिष्ठिकांगुष्ठैर्नासां धारयन्प्राणाया
मिकाप मान्कुर्यात्॥ तत्र पूरकेण नाभिस्थं रक्तं ब्रह्माणं कुंभकेन हृदयस्थं
नीलं विष्णुं रेचकेन ललाटस्थं श्वेतं शिवं ध्यायेत्। ॐ भूः। ॐ भुवः। ॐ ॥३॥
स्वः। ॐ महः। ॐ जनः। ॐ तपः। ॐ सत्यं। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धी ॥३॥
महि। धियो यो नः प्रचोदयात्। ॐ आपो ज्योतिरसोऽमृतं। ॐ ब्रह्म भू

र्भुवः स्वरों॥ दशप्रणवा गायत्री प्राणायामं त्रिवारं कृत्वा। ततो गायत्रीम्
समारभेत्। प्रणवस्य परब्रह्म ऋषिः। परमात्मा देवता। देवी गायत्री छंदः।
ॐ अं बीजं। ॐ शक्तिः। मं कीलकं। विनियोगः। उदात्तः स्वरः। लोतव्यं गोत्रं
। मंत्राणां वसिष्ठ विश्वामित्र भरद्वाजा ऋषयः। गायत्री त्रिष्टुप् जगत्यः
स्तु ५ छंदांसि। ब्रह्मविष्णुमहेश्वरा देवताः। भूरंतरि[illegible]द्यौरिति स्थानानि। गार्हप
त्यदक्षिणाग्न्याहवनीयाः रूपाणि। पीतविद्युच्छ्वेता वर्णाः। गायत्र्यस्त्वनु
स्तुष्टुब्वयोऽवस्थाः। व्याहृतित्रयस्य विश्वामित्रजमदग्निभरद्वाजा ऋ
षयः। अग्निवायुसूर्या देवताः। गायत्र्युष्णिगनुष्टुभः छंदांसि। श्वेत
श्यामपीता वर्णाः। षड्जऋषभगांधाराः स्वराः। पृथिव्यप्तेजांसि बीजा
नि। श्रीकीर्तिमायाः शक्तयः। अग्निवेश्यकाश्यपगौतमानि गोत्राणि।
शब्दस्पर्शरूपाणि तत्त्वानि। विततसमंजलिकराकया मुद्राः। प्राणा
पानव्यानजनितपापोपशमनं फलं। गायत्र्या गायत्री छंदः। विश्वा
मित्र ऋषिः। सविता देवता। वरेण्यमिति बीजं। धियमिति शक्तिः। णकारः साधा
रणाः शक्तिः। यातकीलकं। श्वेतो वर्णः। अग्निर्मुखं। ब्रह्मशिरः। विष्णुर्ह

दर्यं। रुद्रो ललाटं। त्रैलोक्यं चरणौ। पृथ्वी कुक्षिः। सांख्यायनं गोत्रं। त्रि
पदा गायत्री। उपनयनादि संध्योपासने विनियोगः। अथ प्रणवव्याहृति
त्रय गायत्री ऋष्यादि न्यासः। गायत्री प्रथम पादस्य विश्वामित्र ऋ
षिः। ब्रह्मा देवता। गायत्री छंदः। गायत्री छंदः। द्वितीय पादस्य वि
श्वामित्र ऋषिः। रुद्रो देवता। गायत्री छंदः। तृतीय पादस्य विश्वामित्र ऋ
षिः। विष्णुर्देवता। गायत्री छंदः। उपनयनादि प्रातर्गायत्री मध्यान्हे सा
वित्री सायाह्ने सरस्वती संध्योपासने विनियोगः। इति क्रमेणोदयः। ऋ
ग्वेदोऽस्याः प्रथमः पादो भवति। यजुर्वेदो द्वितीयः। सामवेदस्तृतीयः
। अथ पाद न्यासः। पूर्वेति प्रथमा कुक्षिर्भवति। दक्षिणा द्वितीया। प
श्चिमा तृतीया। उत्तरा चतुर्थी। ऊर्ध्वा पंचमी। अधोऽस्याः षष्टी। अ
थ कुक्षिन्यासः। व्याकरणमस्याः प्रथमं शीर्षं भवति। शिक्षा द्वितीयं। ॥४॥
कल्पस्तृतीयं। निरुक्तं चतुर्थं। ज्योतिषामयनमिति पंचमं। अथ शीर्ष
न्यासः। ततो धियो यो नः प्रचोदयादिति करस्पुटिं कृत्वा। ॐ भूर्भुवः
स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदया

दितिगायत्र्याव्यापकंन्यासंकृत्वा। ॐभूः अग्न्यात्मने अंगुष्ठाभ्यांनमः।
ॐभुवः वाय्वात्मने तर्जनीभ्यांनमः। ॐस्वः सूर्यात्मने मध्यमाभ्यांन
मः। ॐमहः ब्रह्मात्मने अनामिकाभ्यांनमः। ॐजनः विष्ण्वात्मने कनिष्ठि
काभ्यांनमः। ॐतपः सत्यंरुद्रात्मने करतलकरपृष्ठाभ्यांनमः। ॐभूः
अग्न्यात्मने हृदयाय नमः। ॐभुवः वाय्वात्मने शिरसे स्वाहा। ॐस्वः
सूर्यात्मने शिखायै वौषट्। ॐमहः ब्रह्मात्मने कवचाय हुं। ॐजनः वि
ष्ण्वात्मने नेत्रत्रयाय वौषट्। ॐतपः सत्यं रुद्रात्मने अस्त्राय फट्।
अथ सप्तव्याहृतिन्यासः। ॐतत्सवितुर्ब्रह्मात्मने हृदयाय नमः। ॐव
रेणियं विष्ण्वात्मने शिरसे स्वाहा। ॐभर्गो देवस्य रुद्रात्मने शिखा
यै वषट्। ॐधीमहि ब्रह्मात्मने कवचाय हुं। ॐधियोयोनः विष्ण्वा
त्मने नेत्रत्रयाय वौषट्। ॐप्रचोदयात् रुद्रात्मने अस्त्राय फट्। इ
तिषडंगं कृत्वा। ॐपरोरजसे सावदों इतिदिग्बंधः। ततः ॐभूः अं
गुष्ठाभ्यांनमः। ॐभुवः तर्जनीभ्यांनमः। ॐस्वः मध्यमाभ्यांनमः।

ॐ तत्सवितुर्वरेणियं प्र नामिकाभ्यां नमः। ॐ भर्गोदेवस्य धीमहि कनि
ष्ठिकाभ्यां नमः। ॐ धियो यो नः प्रचोदयात् करतलकरपृष्ठाभ्यां
नमः। ॐ परोरजसे सावदोम् इति दिग्बंधः। ॐ भूः हृदयाय नमः। ॐ भु
वः शिरसे स्वाहा। ॐ स्वः शिखायै वषट्। ॐ तत्सवितुर्वरेणियं कवचाय
हुं। ॐ भर्गोदेवस्य धीमहि नेत्रत्रयाय वौषट्। ॐ धियो यो नः प्रचोदया
त् अस्त्राय फट्। ॐ परोरजसे सावदोम् इति दिग्बंधः। ततो गायत्र्य
क्षरन्यासे ऋषिदेवता छंदः स्थान स्वर वर्ण तत्त्व शक्ति बीज मुद्रापा
तक नाशन परमपद प्राप्त्यर्थं अंगन्यास स्थान के तान्स्मरेत्। गायत्री
चतुर्विंशत्यक्षराणां वसिष्ठ भरद्वाज गौतम भृगु शांडिल्य लोहित ग
र्गश्रीभूः ह सनत्कुमार सत्य वरुण अथर्व क रणप जमदग्नि त्रिविष्णु पराशर पुं
डरीक क्रतु दक्षांगिरः कार्त्तिकेय मार्कंडू गस्त्य विश्वामित्रा ऋषयः॥२४॥
॥१॥ अग्नि वायु सूर्य विद्युत् यमेंद्र विश्वेदेवा पर्जन्येंद्र गंधर्व सत्य मि ॥५॥
त्रा वरुणा त्वष्टृ वसु मरुत् ब्रह्मांगिरस विश्वेदेवा विश्वेदेव गर्गशर्व

प्रश्नविश्वसवितारोदेवता॥२४॥२॥ गायत्र्युष्णिगनुष्टुप्बृहती पंक्तित्रिष्टुप्जगती अतिसप्तविराट्विंशत्यक्षरपंक्त्यक्षरपंक्तिका त्यायनी बृहत्यक्षरपंक्तिकात्यायनपदोरपंक्तिकात्यायनीजगतीजग तीमहीप्रायामतीसत्यागायत्र्यः छंदांसि॥२४॥३॥ उदात्तस्वरितानुदा त्तोदात्तोदात्तस्वरितानुदात्तोदात्तस्वरितानुदात्तोदात्तस्वरितप्रचयप्रच यप्रचयोदात्तानुदात्तोदात्तस्वरितप्रचयानुदात्तोदात्तस्वरिताः स्वराः। ॥२४॥४॥ चंपकातसीपुष्पपिंगलेंद्रनील [illegible] स्फटिकविद्यु त्तारकामेघरक्तम [illegible] तशुक्लकांचनकुंदपद्मरागशंखपांडुर गौररुक्मविद्युत्सूर्येंद्रनीलकुंकुमशुक्लाः वर्णाः॥२४॥५॥ पृथिवी व्यप्तेजोवाय्वाकाशगंधरसरूपस्पर्शशब्दवाकहस्तोपस्थपायुपा दश्रोत्रत्वक्चक्षुर्घ्राणजिह्वामनोऽहंकारचित्तान्यव्यक्तानि तत्वानि॥ ॥२४॥६॥ सत्याप्रभावती। नित्या। शोभना। मेधा। विमला। प्रभावती। जया। प्रह्लादिनी। कांता। जिह्वा। सरस्वती। विद्युद्धर्णी। विश्वरूपा।

तत्वानि ३

विभूति। शान्ती। योगा। शाला। गांधा। रती। प्रीती। पद्मालया। विलासिनी। मल्लु
वाः शक्तयः॥२४॥७॥ ॐ अआ इई उऊ ऋ ए ऐ ओ औ अं अः कचटतपयर
लवक्षा ब्रह्म॥२४॥८॥ सन्मुखं संपुटं विततं विस्तीर्णं एकमुखं द्विमु
मुखं त्रिमुखं चतुर्मुखं पंचमुखं षण्मुखं अधोमुखं व्यापकांजलि
कं शकटं यमपाशं ग्रथितं। सन्मुखोन्मुखं प्रलंबं मुष्टिकं मीनकू
र्मवाराह सिंहाक्रांत महाक्रांत मुद्गर पल्लवा मुद्राः॥२४॥९॥ पातको
पपातक महापातक ग्रह रोग शांति मृत्युहत्या गम्यागमन मांसभक्षण
पुंवध गुरुवध गोवध स्त्रीवध वाग्दोष ग्रामको पितृवध जनि
त सर्वजन्मार्जित पूर्वजन्मार्जित प्रतियुग जनित सर्वजन्मार्जित पात
कनाशन विरंचिपदप्राप्ति विष्णुपदप्राप्ति रुद्रपदप्राप्ति सम्पूर्णब्रह्म
पदप्राप्ति परमपदप्राप्त्यर्थं फलं॥२४॥१०॥ पादांगुष्ठ गुल्फ जंघा जा
नूरु शिश्न वृषण कटि नाभ्युदर स्तनोरः कंठ दंततालु नासिकानेत्र ॥६॥
भ्रूमध्य ललाट पूर्वमुख दक्षिणमुख पश्चिममुखोत्तरमुख मूर्द्धा म१

सैकरांगुलिपर्वन्यासे च विनियोग इति स्मृता ॥२४॥११॥ ॐ त सादांगुष्ठ
पर्वभ्यां नमः। ॐ स गुल्फाभ्यां नमः। ॐ वि जंघाभ्यां नमः। ॐ तुः जानुभ्यां। ॐ व ऊ
रूभ्यां। ॐ रे शिश्नाय। ॐ णि वृषणाभ्यां। ॐ यं कट्यै। ॐ भ नाभ्यै। ॐ र्गो उद
राय। ॐ दे स्तनाभ्यां। ॐ व उरसे। ॐ स्य कंठाय। ॐ धी दंतेभ्यः। ॐ म तालुने।
ॐ हि नासिकायै। ॐ धि नेत्राभ्यां। ॐ यो भ्रूमध्याय। ॐ यो ललाटाय। ॐ नः
पूर्वमुखाय। ॐ प्र दक्षिणमुखाय। ॐ चो पश्चिममुखाय। ॐ द उत्तरमुखा
य। ॐ यात् मूर्ध्ने नमः ॥२४॥१२॥ करन्यासे दक्षिणतर्जन्यंघ्रपर्वादि वा
२५६ म कनिष्ठिकापर्वपर्यंतं तदानीं चतुर्विंशत्यक्षराणि विन्यसेत् ॥ ॐ त
त् दक्षिणतर्जनीप्रथमपर्वणे नमः। ॐ स दक्षिणतर्जनीद्वितीयपर्वणे।
ॐ वि दक्षिणतर्जनीतृतीय०। ॐ तुः दक्षिणमध्यमाप्रथम। ॐ व दक्षिणम
ध्यमाद्वितीय। ॐ रे दक्षिणमध्यमातृतीय। ॐ णि दक्षिण[illegible]
[illegible] अनामिकाप्रथम। ॐ यं दक्षिणअनामिकाद्वितीय। ॐ भ दक्षिण
अनामिकातृतीय। ॐ र्गो दक्षिणकनिष्ठिकाप्रथम। ॐ दे दक्षिणकनिष्ठि

गा० १ ◉काद्वितीय। ॐ वदक्षिणकनिष्ठिका तृतीय। ॐ स्य वामतर्जनीप्रथम। ॐ धी वा
मतर्जनीद्वितीय। ॐ म वामतर्जनी तृतीय। ॐ हि वाममध्यमाप्रथम। ॐ धि
वाममध्यमाद्वितीय। ॐ यो वाममध्यमातृतीय। ॐ यो वामानामिकाप्रथ
मा। ॐ नः वामानामिका द्वितीय। ॐ प्र वामानामिकातृतीय। ॐ चो वामक
निष्ठिकाप्रथमं। ॐ द वामकनिष्ठिकाद्वितीय। ॐ यात् वामकनिष्ठिकातृती छि० ५
यपर्वणे नमः ॥२४॥१३॥ इति करांगुलिपर्वन्यासः॥ ॐ तत् पादाभ्यां नमः।
ॐ सवितुः जंघाभ्यां नमः। ॐ वरेणियं कट्यै। ॐ भर्गो नाभ्यै। ॐ देवस्य हृद
याय। ॐ धीमहि कण्ठाय। ॐ धियः मुखाय। ॐ यो नेत्राभ्यां। ॐ नः ललाटा
य। ॐ प्रचोदयात् मूर्ध्ने नमः। ॐ तत् दक्षिणकरांगुष्ठाय नमः। ॐ सवि
तुः दक्षिणतर्जन्यै। ॐ वरेणियं दक्षिणमध्यमायै। ॐ भर्गो दक्षिणानामिका
यै। ॐ देवस्य दक्षिणकनिष्ठिकायै। ॐ धीमहि वामांगुष्ठाय। ॐ धियः ॥१६॥
वामतर्जन्यै। ॐ यो वाममध्यमायै। ॐ नः वामानामिकायै। ॐ प्रचोदयात्
वामकनिष्ठिकायै नमः। ॐ तत्सवितुः अंगुष्ठाभ्यां नमः। ॐ वरेणियं त

ज्ञली भ्यां। ॐ भर्गो देवस्य मध्यमाभ्यां। ॐ धीमहि अनामिकाभ्यां। ॐ धियो यो
नः कनिष्ठिकाभ्यां। ॐ प्रचोदयात् करतलकरपृष्ठाभ्यां नमः। ॐ तत्सवितु
र्ब्रह्मात्मने हृदयाय नमः। ॐ वरेण्यं विष्ण्वात्मने शिरसे स्वाहा। ॐ भर्गो
देवस्य रुद्रात्मने शिखायै वषट्। ॐ धीमहि ईश्वरात्मने कवचाय हुं। ॐ धि
यो यो नः विश्वात्मने नेत्रत्रयाय वौषट्। ॐ प्रचोदयात् रुद्रात्मने अस्त्रा
य फट्। ततो गायत्रीकवचं बध्नीयात्। तद्यथा। ॐ मिति हृदये। भूरिति मु
खे। भुवरिति शिरसे। स्वरिति सर्वांगेषु। अथ गायत्रीतुरीयपादस्य अथ
र्वपुत्रो विमलऋषिः परमात्मा देवता देवी गायत्री छंदः। अव्यक्तं ब्रह्म
तत्वं। धर्मार्थकाममोक्षार्थे गायत्रीस्तुतौ विनियोगः। इत्यादि स्मृत्वा
ॐ परो हृदयाय नमः। ॐ रजसे शिरसे स्वाहा। ॐ असावदोम् शिखा
यै वषट्। ॐ परो रजसे कवचाय हुं। ॐ असावदोम् नेत्रत्रयाय वौषट्।
ॐ परो रजसे सावदोम् अस्त्राय फट्। इति षडंगं कृत्वा बादशाचार्यो वाज
पेयैर्भगवतीं स्तुवीत। अथ चतुर्विंशत्यक्षरेषु पृथिव्यादितत्वदृढियंग

प्रथमे दले लोकत्रयदृष्टिं । द्वितीये वेदत्रयदृष्टिं । तृतीये प्राणत्रयदृष्टिं । चतुर्थे
ब्रह्मदृष्टिं कुर्यात् । अथ ध्यानं । प्रातः संध्यां गायत्रीं कुमारीं रक्तांरक्तांबरां
रक्तमालां बालां अक्षमाला कमंडलुधरां हंसारूढां ऋग्वेदमुद्गिरंतीं ब्र
ह्मदैवत्यां आदित्यमंडलस्थां साहमस्मीति ध्यायन् आवाहयेत् । ततो ध्या
म ५ नं ॥ मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्र्यक्षणैर्युक्तामिंदुनिबद्धरत्न
मुकुटां तत्वात्मवर्णात्मिकां ॥ गायत्रीं वरदाऽभयांकुशकुशांश्शुभ्रं कपालं
गुणं शंखं चक्रमथारविंदयुगलं हस्तैर्वहंतीं भजे ॥१॥ मंदराद्रुयरोच
नांजननिभा गवात्तैर्मुखैरिंदुमद्भ्रोद्यन्मुकुटांगसंततन चतुर्विंशार्ण
८ चित्रातनुः ॥ अंभोजेऽरिचक्रशंखौ दराक्षयौ गुणकपालाख्यौ च पाशांकु
शौ दधानीति त्रिदेवी नवेद्भवदधच्चोत्तारिणी तारिणी ॥२॥ प्रातर्ध्यानं ॥ प्रा
तः संध्यां सुमध्यां सदरुणवसनां विद्रुमाभ्यंतराभां बालां हस्ताक्षमालां
कमलधृतकरां हंसवाहां द्विवाहां गायत्रीमुद्गिरंतीमनवरतमृचो ब्रह्म ॥८॥
दैवत्यचिंत्यां नानास्वच्छिवांतरालस्थियमतिमहसे साहमस्मीत्युपासे ॥३॥
मध्याह्नध्यानं ॥ मुख्यां मध्याह्नसंध्यां सितचंदनलसच्छचिशंखाद्यव्ह

त्रिंवसानां हस्तेधत्ते त्रिशूलं डमरुमपि यजुर्वेदमध्युषितंती॥ सावित्रीसवाने
त्रांसितवृषभगमनां रुद्रदैवत्यचिंत्यां नित्यामादित्यकांत्यालतनुमनुसा
हमस्मीत्युपासे॥२॥ सायं ध्यानं॥ सायं संध्यां स्थलध्वां खगपतिगमनां श्या
मवर्णां सुमध्यां शंखचक्रं दधानां करयुगयुगले सारसूचनीमुदारां॥ पी
तंवस्त्रं दधानां रवितनुवसनां विष्णुदैवत्यचिंत्यां सामवेदं वदंती स्थितसुम
समांस्ताहमस्मीत्युपासे॥३॥ अथ त्रिकालसहरी ध्यानं॥ पंचवक्त्रां चतुर्ह
स्तां प्रतिवक्त्रत्रिलोचनां॥ जटाकिरीटबद्धकुलिं त्रिपदां स्फटिकप्रभां॥
साक्षसूत्रवयांकुशौ दधतीं दक्षिणहस्तयोः॥ साचीरीकमलंपत्रंवरदं नंदन
कुलंवामहस्तयोः॥ दिव्यंपरिमितां कुक्षिं पूर्वपश्चिमयोः क्रमात्॥ रक्तं
कंकणकेयूरहारकुंडलनूपुरैः॥ रत्नोरवद्यैरन्यैः शन्नरत्नैर्वरैः॥ शो
भितां रत्नपीठस्थां गायत्री चर्द्ध संस्थितां॥४॥ एवं देवीं सदा ध्यायन्नज
पं कुर्वीत यो द्विजः॥ सर्वपापविनिर्मुक्तः स्ववांछितफलं लभेत॥५॥
एवं ध्यानं॥ ततः पूजा॥ आयात्विति मंत्रस्य विश्वेदेवा ऋषयः॥ ग्नुत्रोदेवता॥

२ सावित्रीमावाहयामि।ॐ सरस्वतीमावाहयामि।ॐ छंद४ ऋो२
ऋषिमावाहयामि४
अनुष्टुप्छंदः। गायत्र्यावाहने विनियोगः॥ॐ आयातु वरदा देवी अक्षरं ब्र
ह्मसंमितं॥ गायत्री छंदसां माता इदं ब्रह्म जुषस्व नः॥ ओजोसि सहोसि बलमसि
भ्राजोसि देवानां धाम। नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुः
अभिभूरों गायत्रीमावाहयामि॥ॐ आगच्छ वरदे देवि जाप्ये मे सन्निधिं
कुरु॥ गायंतं त्रायसे यस्मात् गायत्री त्वं ततः स्मृता॥ इति भगवतीमावाह्य
सव्याहृतिकं गायत्रीमंत्रमुच्चार्य धर्मादिपीठे तत्पीठे गायत्री सावरण
सहितां लिखेत्॥ अथ पीठोद्धारक्रमः॥ ॥शारदातिलके शांनुकोणविल
सद्भूरादि सत्कर्णिक चक्षुर्बस्वरयुग्मके सरदलैर्वर्गैस्त्रिवर्णौ मनौः॥ चूड
१ मंत्रतुरीय वेष्टितमदं द्याकोणतारांकितं गायत्र्याः कथितं महः प्रवत्तति
निर्यंत्रंतु दिव्यं किंतं॥१॥ ह्रींकारं कर्णिकामध्ये व्याहृतीनां त्रिकोणके॥ व
तिष्याष्टदलं पद्मं प्रोक्तं लक्षणलक्षितं॥२॥ केसरे बुस्वरान्लिखा मंत्र ॥४॥
बर्णी स्वरयस्त्रयः॥ आदिवर्गाक्षरा ब्रोचवहि मीहिंदु मंडलं॥ आपो
ज्योतिरित्येतस्य वेष्टयेदानुत्तमं॥ भूजैरेनं समालिख्य कुंकुमं रो

चनादिकं ॥ मंत्रराजं समंद्रत्थं जपेदिष्टार्थसिद्धये ॥ एवं धर्म्मपीठमुद्धार्य
गायत्रीमंत्रदेवतालिख्य । अष्टदलपद्ममध्ये ॥ दिक्षु धर्म्माय नमः । ज्ञाना
य नमः । ॐ वैराग्याय नमः । ऐश्वर्य्याय नमः । विदिक्षु अधर्म्माय नमः । अ
ज्ञानाय नमः । अवैराग्याय नमः । अनैश्वर्य्याय नमः । मध्ये मूलाय । कं
दाय । नीलाय । तमसे रजसे । वामायै । तत्वात्मने । विद्यातत्वात्मने । पत्रेभ्यः ।
केसरेभ्यः । कर्णिकायै । पृथिव्यै । कूर्म्माय । अनंताय । आधारशक्त्यै नमः
। सर्वत्र एवं मंत्रः । पूजितपीठे तां प्रतिष्ठाप्य आवाह्य अष्टमुद्राः प्रदर्श्य
ॐ भूः नमः आवाहनं । ॐ भुवः स्थापयामि नमः । ॐ स्वः सन्निधानं । ॐ म
हः सन्निरोधनं । ॐ जनः सकलीकरणं । ॐ तपः अवगुंठनं । ॐ सत्यं अमृ
तीकरणं । ॐ भूर्भुवः स्वः परमीकरणं । ततः पूजा गायत्र्यै सांगायै सायुधा
यै सपरिवारायै सवाहनायै सवर्णायै आसनं परिकल्पयामि नमः इति
गंधपुष्पधूपदीपनैवेद्यतांबूलादीन् षोडशोपचारान् मनसा समर्प
येत् ॥ ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही ऐंद्री चामुंडा महालक्ष्मी
रिति शक्तीर्देव्याधिष्ठितपत्रमध्येषु अर्चयेत् । असितांग रुरुं चं

डंक्रीधमुन्मत्तभैरवं ॥ कपालं त्रीशूलं चैव संहारं चाष्टभैरवान् ॥ पद्ममप
त्रागे प्रदर्शयेत् ॥ एवं मानसपूजां कृत्वा सर्वं ध्यात्वा चतुर्विंशतिमुद्राः प्र
दर्शयेत् ॥ ताश्च व्यासेन दर्शिताः ॥ अथ चतुर्विंशतिमुद्राः संमुखं संपुटं तथा ॥ दर्शये
ततो विततविस्तीर्णे द्विमुखत्रिमुखे ततः ॥१॥ चतुर्मुखं पंचमुखं षण्मु
खाधोमुखे ततः ॥ व्यापकाञ्जलिकं चैव शकटं तदनंतरं ॥२॥ यमपाशं च ग्र
थितं ततः स्यात्सन्मुखोन्मुखं ॥ विलम्बो मुष्टिको मीनस्ततः कूर्मवराहकौ ॥
॥३॥ सिंहक्रांतं महाक्रांतं ततो मुद्गरपल्लवौ ॥ एताश्च मुद्राः देवताक्षीन
न्नयेमहाजनस्यागमेन दर्शनीयाः ॥ ॥ ममोपात्तदुरितक्षयद्वारा श्री
10 परमेश्वरप्रीत्यर्थं अष्टोत्तरशतादिसंख्याकं गायत्रीजपं करिष्ये इति संक
ल्प्य ॥ प्रातस्तिष्ठन्नुत्तानपाणिर्मध्याह्ने चासीनस्तिर्यग्वा कपाणिः
प्र प्रमुदकेशेडमुखो विषयेभ्यो मनः संहृत्य शुचिर्मौनी अव्यग्रो निर्वि
लोमं त्रार्थमनुसंदधानः शनैः त्वरा जपेत् ॥ उच्चैरुपांशुः । मानसं वा ॥१०॥
हिताक्षमालया अंगुलीपर्वभिर्वा जपं कृत्वा षडंगन्यासः । ततः सुरभिः ज्ञानं
सिंहाच योनिः । कूर्मोऽथ पंकजं । लिंगं । निर्याणमुद्राष्टौ जपांते च

प्रदर्शयेत् । जपांते एवं षडंगन्यासः कर्त्तव्यः । ॐ तत्सवितुर्ब्रह्मात्मने हृदया
य नमः । ॐ वरेण्यं विष्ण्वात्मने शिरसे स्वाहा । ॐ भर्गो देवस्य रुद्रात्मने शि
खायै वषट् । ॐ धीमहि ब्रह्मात्मने कवचाय हुं । ॐ धियो यो नः विष्ण्वा
त्मने नेत्रत्रयाय वौषट् । ॐ प्रचोदयात् रुद्रात्मने अस्त्राय फट् । इति ष
डंगः । ततश्च तुर्यपादेनापि पूर्ववदेव षडंगः कर्त्तव्यः । उत्तमे इति मंत्र
स्य विष्णुऋषिः देवी देवता । अनुष्टुप् छंदः । आवाहने विसर्जने विनि
योगः । ॐ उत्तमे शिखरे जाता भूम्यां पर्वतमस्तके ॥ ब्राह्मणैस्त्वमनुज्ञा
ता गच्छ देवि यथासुखं ॥ गुह्यातिगुह्यगोप्त्री च गृहाणास्मज्जपं कृतं
॥ जपसिद्धिर्भवतु मे त्वत्प्रसादात्त्वयि स्थिता ॥ इति जपं समर्प्य पश्चाद्गा
यत्रीतर्पणं ॥ प्राणानायम्य गायत्र्या आर्यादि स्मरन् तर्पणे विनियोगः
इत्युक्त्वा षडंगं कृत्वा पूर्ववदेव । जले स्थले वापि गायत्रीपीठदेवतामु
द्भाव्य मानसैरुपचारैः संपूज्य तदुपरि तर्पणं कारयेत् । ॐ भूर्भुवः कुर्यात्
स्वः पुरुषमृग्यजुःसाममयं मंडलांतर्गतं सवितारमावाहयामि
इत्यावाह्य तर्पणं कुर्यात् । तत्रैवं मंत्राः ॥ ॐ भूर्भुवः स्वः तत्सवितुर्वरे

णीयं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ तर्पयामि नमः ।इति
पुरश्चरणादङ्गाङ्गेन तर्पणं नित्यतर्पणं । ॐ भूः पुरुष ऋग्वेदाय नमस्तर्प
यामि ।ॐ भुवः पुरुष यजुर्वेदाय नमस्तर्पयामि ।२। ॐ स्वः पुरुष साम
वेदाय नमस्तर्पयामि ।।३।। ॐ महः पुरुष अथर्ववेदाय नमस्तर्पयामि ।।४।।
ॐ जनः पुरुष [illegible] इतिहासपुराणाय नमस्तर्पयामि ।।५।। ॐ तपः पु
रुष सर्वांगमाय० ।।६।। ॐ सत्यं पुरुष [illegible] लोकाय० ।।७।। ॐ भूर्भुवः स्वः पुरु
ष ऋग्यजुः साममंडलांतर्गताय नमः सवित्रे ।।८।। ॐ भूः एकपदा गायत्र्यै
।।९।। ॐ भुवः द्विपदा गायत्र्यै० ।।१०।। ॐ स्वः त्रिपदा गायत्र्यै ।।११।। ॐ भूर्भुवः
स्वः चतुष्पदा गायत्र्यै० ।।१२।। ॐ उषसे नमः ।।१३।। ॐ गायत्र्यै ।।१४।। ॐ सावि
त्र्यै० ।।१५।। ॐ सरस्वत्यै० ।।१६।। ॐ वेदमात्रे० ।।१७।। ॐ पृथिव्यै० ।।१८।। ॐ अजायै
० ।।१९।। ॐ सांकृत्यै ।।२०।। ॐ कौशिक्यै० ।।२१।। ॐ सर्वपराजित्यै० ।।२२।। ॐ सह
स्रमूर्त्यै० ।।२३।। ॐ अनंतमूर्त्यै नमस्तर्पयामि ।।२४।। मंत्रैरेतैस्त्रिसंध्यायां नित्यं ।।११।।
गायत्रीं वेदमातरं ।। चतुर्विंशतिसंख्याके तर्पितं सचराचरं ।। इति गायत्री
तर्पणं ।। अथ संध्यातर्पणं ।। गायत्र्याः विश्वामित्र ऋषिः । ब्रह्मादेवता। गायत्री

छंदः ॥ ॐ भूः पुरुषंतर्प्पणं करिष्ये ॥ ॐ भूः पुरुषंतर्प्पयामि ॥१॥ ॐ ऋग्वे
दंतर्प्पयामि ॥२॥ ॐ रवि मंडलं० ॥३॥ ॐ हिरण्यगर्भरूपिणं० ॥४॥ ॐ
आत्मानं० ॥५॥ ॐ गायत्री० ॥६॥ ॐ वेदमातरं० ॥७॥ ॐ सांकृतिं० ॥८॥
ॐ संध्यां ॥९॥ ॐ कुमारी० ॥१०॥ ॐ ब्राह्मी० ॥११॥ ॐ उषसी ॥१२॥ ॐ निम्
जां० ॥१३॥ ॐ सर्वार्थसिद्धिकरी० ॥१४॥ ॐ सर्वमंत्राधिपती० ॥१५॥ ॥
ॐ भूर्भुवः स्वः पुरुषंतर्प्पयामि नमः ॥१६॥ तर्प्पयामि नम इती प्रत्ये
कं संबंधः ॥ इति प्रातः संध्यातर्प्पणं ॥ ॥ अथ मध्याह्न संध्यातर्प्पणं ॥
ॐ मध्याह्न काले संध्या सावित्र्याः कश्यप ऋषिः । रुद्रो देवता । अग्निकु
छंदः ॥ ॐ भुवः पुरुषंतर्प्पणं करिष्ये ॥ ॐ भुवः पुरुषंतर्प्पयामि ॥१॥
ॐ यजुर्वेदं तर्प्पयामि ॥२॥ ॐ मंडलं तर्प्पयामि ॥३॥ ॐ रुद्ररूपिणं० ॥४॥
ॐ अंतरात्मानं० ॥५॥ ॐ सावित्री ॥६॥ ॐ वेदमातरं० ॥७॥ ॐ सांकृतिं
० ॥८॥ ॐ संध्यां० ॥९॥ ॐ युवतिं० ॥१०॥ ॐ रौद्री० ॥ ॐ मध्याह्नी० ॥१२॥
ॐ निम्रुजां० ॥१३॥ ॐ सर्वार्थसिद्धिकरी० ॥१४॥ ॐ सर्वमंत्राधिपती

तर्पयामि ॥१५॥ ॐ भूर्भुवः स्वः स्तर्पयामि नम इति प्रत्येकं संबंधः ॥१६॥ ॐ इ
ति सायं संध्यातर्पणं ॥ पश्चात् दाचमनं प्राणायामान् कृत्वा । गायत्र्याः जपं नि
वेदयेत् ॥ जपतर्पणानंतरं होमः ॥ गृहे कुंडं स्थंडिलं वा कृत्वा पश्चा
मे ५ त् होमं समारभेत ॥ शतहोमे रत्निमात्रं । सहस्रहोमे अरत्निमात्रं ॥
दशाहुतिहोमे नित्योपासनं कुर्यात् । अयुतहोमे बाहुमात्रं । लक्षहो
मे द्विहस्तकं ग्रंथए ॐ महाकुंडं ग्रीवाकंठ योनि मेखलासहितं ॥ स्रु
क्स्रुवौ यथालाभौ ॥ सुस्थिरासने उपविश्य संकल्प्य । पूर्वोक्तं एवं
112 गुणविशिष्टायां शुभतिथौ मम सुसिद्ध्यर्थं पुरश्चरणसांगतासिद्ध्यर्थं ज
पतर्पणदशांशेन होमं करिष्ये । तदंग स्थंडिल उपलेपनं उल्लेखनं अ
ग्निप्रतिष्ठापनमहं करिष्ये । प्राणायामं विधाय करन्यासमंगन्यासं पू
र्ववत् सर्वन्यासं कृत्वा । पश्चात् ध्यानं ॥ व्यजनं तोमरं चैव स्रक् स्रुचौ दक्षि ॥१२॥
णे करे । दधानं वामहस्तेन घृतपात्रं विशेषतः ॥ एवं ध्यात्वा ॥ आयांतु दे
वं पुरुषं महांतं सुरासुरैर्वन्दितं हरी — रुद्रं । देवादयो येऽग्निमुखा मुख स
रुरिः । त्रिमेखलं त्रिपादं च सप्तजिह्वाभिरावृतं ॥ मेषारूढं चतुःशृंगं जटामुकुटमंडितं ३

वेश्य विशेयकुंडे सुरलोकनायाः ॥ पश्चात्सूचयत्या मूलमंत्रेण ध्यानं कृत्वा
पीठदेवताः स्मृत्वा अन्वाधानं करिष्ये। तत्र देवतापरिग्रहार्थं अस्मिन्
न्वाहिते वरदाग्नौ जातवेदसमग्निमिध्मेन प्रजापतिरन्वाधारे आ
ज्येनाग्निं सोमो आज्येन अत्र प्रधानं गायत्रीं सावित्रीं सरस्वतीं एताः
प्रधानदेवताः तिलाक्षतपायसाज्यद्रव्येण स्विष्टकृतमिध्मसन्न
हनेन रुद्रं । अ — समाग्नेः देवान्विकृं अग्निं वायुं सूर्यं प्रजापतिं च एताः
सर्वाः प्रायश्चित्तदेवता आज्येन अंगदेवताः प्रधानदेवताः सर्वाः सन्नि
हिताः संतु सांगोपांगेन कर्मणा अयक्ष्ये। ॐ भूर्भुवः स्वः स्वाहा
प्रजापतये इदं न मम एवमन्वाधानं कृत्वा सर्वं गृह्योक्तं माचरेत्। व
र्णलक्षं जपेन् मंत्रं तर्पयेत् दशांशकं॥ विल्वैः फलैः प्रसूनैर्वा — — स्त्रि
मधुसंयुतैः॥ कुर्याद्दशांशतो होमं ततः सिद्धो भविष्यति॥ मधुत्रितय
युक्तेन जुहुयात् पायसेन वा॥ कुवेरदृष्टोलक्ष्म्या विद्या याद्दिप्राणप
ते॥ यस्त्वेवं यजते भक्त्या जपहोमार्चनादिभिः॥ स भुंक्ते सकलान्भो
गान्तेते तत्पदमाप्नुयात्॥ द्वादशाहं त्रिसहस्रं जपेच्च जुहुयाद्घृतं॥ त्रि

संध्यं सूर्पिबानि सैं नि यवेदिं द्वि[illegible]याएप — ॥ त्रयोदशे दिने व्रापेनिम ज्या
स्तु रातं जपेत् ॥ एतत्त्रयाणां वर्णानां साधनं स्यात्त्रदि — वा। जपशील
स्य विप्रस्य विना सिध्यति साधनं ॥ साधने नानुलोमायां विलोमायां
विप्र सिध्यति ॥ जपे प्रशस्ता सावित्री प्रणवेन समन्विता ॥ आतिपूराश्च
केन स्याद्व्याहृति त्रितयेन च ॥ होमादौ प्रणवेनैव व्याहृतिभिरन्विता ॥
जपे विप्र प्रणवेनैव प्रतिलोमा प्रशस्यते ॥ प्रणवेन विलोमाभिर्व्याहृति
भिः प्रशस्यते ॥ क्रूरे शांतिषु सेपुष्टि रभिचारे ततः परं ॥ आसंध्याया
दिवा कुर्यात्सर्वं रात्रौ न किंचन ॥ अपशांतिप्राच युक्ताभिः समिद्भिर्जु
हुयाद्विजः ॥ शमीमयीभिः शाम्यंति भूतरोग गदादयः ॥ अक्ता
भिः दीरि वृक्षस्य समिद्भिर्जुहुयाद्विजः ॥ जुहुयात्सकलैर्वापि भू
तरोगादिशांतये ॥ अपामार्गसमिद्भिर्वा यष्टीकैः सर्व शांतये ॥ दू
र्वाभिः पायसान्नाभिर्होमो भूताधि मोचकः ॥ तिलहोमात्त्वशमं यांति ॥१३॥
कुपिताः सर्व देवताः ॥ परापचार संभूता दोषा देवग्रहास्तथा ॥ त्रिमध्व
क्तैस्तिलैर्होमात्त्वशमं यांति न संशयः ॥ जुहुयात्पंचगव्येन भूतरो

गादिशांतये॥ जलेनतर्पयेत्सूर्यं पाणिभ्यां शांतिमाप्नुयात्॥ नाभिदघ्ने
जलेस्थित्वाजपेच्छांतिमवाप्नुयात्॥ नाभिदघ्ने जलेजप्त्वा सर्वान्दोषान्
विनाशयेत्॥ कंठदघ्ने जलेजप्त्वा मुच्येत्प्राणांतिकाद्भयात्॥ निमज्याप्सु
शतंजप्त्वा सर्वपापैः प्रमुच्यते॥ सर्वेभ्यः शांतिकर्मभ्यो निमज्याप्सु
जपोवरः॥ क्षीराहारी जपेल्लक्षं सभपन्तुं व्यपोहति॥ घृतेनश्राप्नुयान्मे
धांबहुवि[illegible]द्यो न संशयः॥ हुत्वावेतसपत्राणि घृताक्तानि हुताशने
लक्षद्वयेनहोमेन सार्वभौमो न संशयः॥ लक्षेण न सुहोमेन लक्ष्मीवा
ख्यातिष्ठतेनरः॥ आदित्याभिमुखःस्थित्वा नाभिमात्रे जलेजपेत्॥ ति
लेनलक्षहोमेन घृताक्तेन हुताशने॥ सर्वपापविशुद्धात्मा रूपमै
श्वर्यमाप्नुयात्॥ तिलतंडुलसंयुक्तं घृतानां बहुहुताशने॥ सर्वपाप
विशुद्धात्मा परंस्थानमवाप्नुयात्॥ पंचगव्येन लक्षस्यजपेज्जातिस्म
रोभवेत्॥ तद्देवास्यस्मरणं हुत्वाप्राप्नोति बहुगोधनं॥ अन्नाज्यहव
नं नित्यमन्नाज्यं लभते सदा॥ लवणं मधुसंयुक्तं [illegible]वश्याशी ससर्वक

र्भेणि ॥ जुहुयात्सर्वसमिधा आहुत्याऽयुतसंख्यया ॥ रक्तसिद्धार्थकं जु
हुयात्तै हुत्वा वै सर्वसाधनं ॥ रिपुरक्तकरवीराणि हुत्वा द्रावयते नरान् ॥
हुत्वा वै भीतकं तैलं दिशो दश प्रचालयेत् ॥ हुत्वा तु निंबपत्राणि विद्वेषं
कुरुते नृणां ॥ प्रत्यायन सिद्धार्थं मधुसर्पिः समन्वितं ॥ गव्याक्षी
रं प्रदीप्ताग्नौ जुहुयात्तत्र सम्भृतं तत् ॥ हवने चामितात्कारः सह
स्त्रत्रितयं जपेत् ॥ संवत्सरेणाल्पमतेर्धनमेव न संशयः ॥ समि
कौणं ॥ द्भिर्बिल्वपलाशानां मर्कजं तु विशेषतः ॥ पुष्पाणां समिधश्चैव हु
त्वा ते भवाप्नुयात् ॥ चतुर्विंशतिलक्षं तु कुर्वीत जपमादरात् ॥
जुहुयात्तद्दशांशेन तद्दशांशे तर्पणं ॥ मार्जनं तद्दशांशेन तथा ब्रा
15 ह्मणभोजनं ॥ एवं कृते तु सिद्धिः स्यात्फलार्थं तु ततो जपेत् ॥ पुरश्च
रणमेकं तु लोकासंपूज्य सरस्वती ॥ अयुतेहैयजे क्रोमः कार्योऽर्क ॥१४॥
समिधैः शुभैः ॥ औदुंबरैरन्नकामस्तेजः कामस्तु खादिरैः ॥ अपा
मार्गसमिद्भो माद्भूतबाधाविनश्यति ॥ ग्रहबाधाविनाशाय जपेदश्व

त्यसन्निधौ ॥ लवणान्वितदध्याक्तो तीक्ष्णा मान्नत्यसंभवाः ॥ हूयंते समिधः शुक्लो स्वाहांते मंत्रमुच्चरेत् ॥ दशांपंचाहुती हुत्वा गच्छगच्छेत्युदीरयेत् ॥ यावद्धोमं च दद्यंतु पुरुषाहारसम्मितं ॥ एवं कृते विमुच्येत पुमान् स्त्री वा महाग्रतात् ॥ यजेत निच्छेत् पुरुषं तस्याना भिमुखो भवेत् ॥ जुहुयाद्घृतपुष्पाणि सहस्राणीष्ट माप्नुयात् ॥ लाजाहोमं तु कन्यार्थी कन्यां प्राप्नोति रूपिणीं ॥ लाजाश्च मधुसंयुक्ताः श्वेतपुष्पाणि वा पुनः ॥ हूयंते हरितदेशेन स्प विश्वं वशी भवेत् ॥ वामांगमुन्नतं कार्यं स्त्री वशीते विचक्षणैः ॥ अरिसैन्यप्रशांतार्थं तिलानाज्येन संयुतान् ॥ होमः पालाशसमिधैः कर्त्तव्यो घृतसंयुतैः ॥ वृष्टिकामो जपेल्लक्षं तिलहोमघृतादितैः ॥ एवं कृते तु सिद्धिः स्यान्नितकामः प्राप्नुयात्परं ॥ स कामः प्राप्नुयाच्छीघ्रं गायत्र्याः साधनं च तत् ॥ श्रीकामः शांतिकामो वा जपेल्लक्षमतंद्रितः ॥ श्रीकामो विल्वसमिधैः शांतिकामः शमीमयैः ॥ जुहुयादाज्यसमिधेस्त पर्णं मार्जनं ततः ॥ एवं सर्वेषु कामेषु होमांते जुहुयाद्घृतैः ॥ जुहुयात्सेत्तु पूर्णामायसं जुहुयात्ततः ॥

वित्तार्थी श्रीफलैर्होममायुःकामस्तु दूर्वया ।। तिलैरेवाज्यसमिधैस्तेजः
कामो घृतेन वै ।। व्रीहिभिः पशुकामस्तु राज्यकामस्तु वै यवैः ।। पायसं स
र्वकामेषु होतव्यं शर्करान्वितं ।। भानोन्याम्रपत्राणि तीव्रज्वरविनाश
ने४ नं ।। सर्वरोगविनाशाय सूर्यस्याभिमुखो भवेत् ।। एतत्त्रयाणां व
र्णानां गायत्र्याः साधनं महत् ।। अनया सर्वकार्याणि साधयेदात्म
संस्थितान् ।। कृत्वा चैवोदिशीन्यस्य पवित्रं पापनाशनं ।। पश्चात्स
माहितः कुर्यात्तद्ध्यानं चापि समन्वितः ।। ईदृशीं चैव गायत्रीं ध्यायते
यस्तु नित्यशः ।। सर्वपापविनिर्मुक्तः स गच्छेत्परमं पदं ।।५।। गाय
त्रीकृतविन्यासो विप्रो वेदषडंगवित् ।। तारयित्वा तथा गोत्रान् कुलां
नामेकविंशतिं ।। यं यं स्पृशति हस्तेन यं यं पश्यति चक्षुषा ।। यं यं
15 ध्यायति गायत्रीं स सर्वः पूत एव च ।। दशभिर्जन्मजनितं शतेन तु
पुरा कृतं ।। त्रियुगं तु सहस्रेण गायत्री हन्ति दुष्कृतं ।। एकतश्चतु ।।१५।।
रो वेदाः सांगाश्च सपदक्रमाः ।। एकतश्चैव गायत्री तुल्यरूपा न वै
तदा ।। गायत्र्या न परं जाप्यं गायत्र्या न परं तपः ।। गायत्रीजपतो नि

त्यं पुनर्जन्म न विद्यते ॥ ॥ इति श्रीगायत्रीब्रह्मकल्पः समाप्तः ॥ श्री

वमस्तु ॥ ॥ अथ वसिष्ठशापविमोचनी गायत्री जपित्वा पश्चाज्जप्याय

त्री न्यास ध्यान जप होमः ॥ अस्य श्री वसिष्ठशापविमोचनी गायत्री

मंत्रस्य विश्वामित्र ऋषिः । सूर्यो देवता गायत्री छंदः । वसिष्ठशापवि

मोक्षार्थे जपे विनियोगः । ॐ तत्सवितुर्ब्रह्मात्मने हृदयाय नमः इति षड

गकरन्यासं कृत्वा । पश्चाज्जपः ॥ ॐ अहो देवि महादेवि दिव्ये संध्ये सरस्व

ति ॥ अजरे अमरे चैव ब्रह्मयोनि नमोस्तु ते ॥ वसिष्ठशापान्मुक्ता ॥

भव इति मंत्रः ॥ आगच्छ वरदे देवि इत्यावाहन दशाश्वमेध वाजपेय ॥ श्रीः

गायत्री प्रकृतिः प्रोक्ता प्रणवः पुरुषस्तथा ॥ ताभ्यामुपस्थयोगाद्धि

मास्तुति रितीरिता ॥ १ ॥ प्रणवं पूर्वमुद्धृत्य भूर्भुवः स्वस्तथैव च ॥ तु

रीयसहैव गायत्र्या जप एवमुदाहृतः ॥ २ ॥ रक्तांगीसु रजोगुणास्तु

नयनां हंसाधिरूढां स्मरेद्द्विवाणामुनयं मुपवसास्त्रजं स्तु कुस्तु

चं ॥ गायत्रीम जदेवतां द्विजरक्तां यज्ञोपवीतोत्पलां ॥ वालां भानुप

।।१ ध्यायस्थां मनुपमां रुग्ररूपिणीमुज्ज्वलां ।।१।। रौद्रीं भुवननुंतमोगुण
युतां सूर्याध्वगां सुंदरी त्र्यक्षां [illegible] चतुर्भुजां सितवृषारूढां महारुद्र
द्युतिं ।। खड्गं गामभयं शूल खड्गं विलसत्पाणिं च जूरूपिणीं सावित्री
रविमार्गगां च युवतिं मध्यंदिने संस्मरेत् ।।२।। ध्यायेत्सत्वगुणां च
तुर्भुजयुतां नीलोत्पलश्यामलां चक्रं शंख ---- भुजगदा
पाणिं सुपर्णस्थितां ।। संध्यां साममयीं सुरासुर युतां सूर्याध्वगां सुंद
रीं सद्धियां च सरस्वतीं भगवतीं तुंगस्तनीं वैष्णवीं ।।३।। मुक्ताविद्रुम ।।
।।४।। आदित्यमंडल ।।४।। वह्निनिष्ठो भवेद्विप्रस्त्वारः कालसंज्ञकाः ।।
कालेका[illegible]कर्तव्या शुद्धिर्भवति नान्यथा ।। इति श्रीवालखिल्यसंवादे भग
वत्प्रोक्ते स्वारोचिषमन्वंतरे सांख्ययोगसारे [illegible] श्रीमत्ततुष्पदाव
लगायत्री हृदयं संपूर्णं ।। ॐ तत्सद्ब्रह्मार्पणमस्तु ।। अंगं पादपदं वर्णं चंपकं तत्व
मावृत्तं ।। ध्यानं न्यासं दंडमालाश्च मुद्राण्येतानि वेदयेत् ।। श्रुतं विंदुयुतं विसर्गसहितं
ह्रीं श्रैस्वरया श्रीयुतं --- संपूरितं तत्थैव परयाश्रीविद्यया लंकृतं ।। आरोहा
द्वरोहणं च कुरुते न्यासं तयो संगमा -- दत्वा ध्याविभज्य कुरुते साक्षात्स